वयवानां प्रथिमानुपपत्तेर्जीवस्याणुमात्रत्वप्रसङ्गः स्यात्। अपि च शरीरमात्रपरिच्छिन्नानां जीवावयवानामानन्त्यं नोत्प्रेक्षितुमपि शक्यम्। अथ पर्य्यायेण बृहच्छरीरप्रतिपत्तौ केचिज्जीवावयवा उपगच्छन्ति तनुशरीरप्रतिपत्तौ च केचिदपगच्छन्तीत्युच्येत। तत्राप्युच्यते। "न च पर्य्यायादप्यविरोधो विकारादिभ्यः" सू०। न च पर्य्यायेणाप्यवयवोपगमापगमाभ्यामेव तत्तद्देहपरिमाणत्वं जीवस्याविरोधेनोपपादयितुं शक्यते कुतः? विकारादिदोषप्रसङ्गात्। अवयवोपगमापगमाभ्यां ह्यनिशमापूर्य्यमाणस्योपक्षीयमाणस्य च जीवस्य विक्रियावत्त्वं तावदपरिहार्य्यं विक्रियावत्त्वे चर्म्मादिवदनित्यत्वं प्रसज्येत ततश्च बन्धमोक्षाभ्युपगमो बाध्येत कर्म्माष्टकपरिवेष्टितस्य जीवस्यालाबुवत् संसारसागरे निमग्नस्य बन्धनोच्छेदादूर्द्ध्वगामित्वम्भवतीति। किञ्चान्यत् आगच्छतामपगच्छतां चावयवानामागमापायधर्म्मवत्त्वादेवानात्मत्वं शरीरादिवत्। ततश्चावस्थितः कश्चिदवयव आत्मेति स्यात्। न च स निरूपयितुं शक्यते अयमसाविति। किञ्चान्यत् आगच्छन्तश्चैते जीवावयवाः कुतः प्रादुर्भवन्ति, अपगच्छन्तश्च क्व वा लीयन्त इति वक्तव्यम्। न हि भूतेभ्यः प्रादुर्भवेयुः भूतेषु च निलीयेरन्, अभौतिकत्वाज्जीवस्य। नापि कश्चिदन्यः साधारणोऽसाधारणो वा जीवानामवयवाधारो निरूप्यते प्रमाणाभावात्। किञ्चान्यत् अनवधृतस्वरूपश्चैवं सत्यात्मा स्यात् आगच्छतामपगच्छताञ्चावयवानामनियतपरिमाणत्वात्। अतएवमादिदोषप्रसङ्गान्न पर्य्यायेणाप्यवयवोपगमापगमावात्मन आश्रयितुं शक्येते। अथ वा पूर्व्वेण सूत्रेण शरीरपरिमाणस्यात्मन उपचितापचितशरीरान्तरप्रतिपत्तावकार्त्स्न्यदोषप्रसञ्जनद्वारेणानित्यतायां चोदितायाम् पुनः पर्य्यायेण परिमाणानवस्थानेऽपि स्रोतःसन्ताननित्यतान्यायेनात्मनो नित्यता स्यात् यथा रक्तपटादीनाम् विज्ञानानवस्थानेऽपि तत्सन्ताननित्यता तद्वद्विसिचामपीत्याशङ्क्यानेन सूत्रेणोत्तरमुच्यते। सन्तानस्य तावदवस्तुत्वे नैरात्म्यवाद प्रसङ्गः वस्तुत्वेऽप्यात्मनो विकारादिदोषप्रसङ्गादस्य पक्षस्यानुपपत्तिरिति। "अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः" सू०। अपि चान्त्यस्य मोक्षावस्थाभाविनो जीवपरिमाणस्य नित्यत्वमिष्यते जैनैः तद्वत् पूर्व्वयोरप्याद्यमध्यमयोर्जीवपरिमाणयोर्नित्यत्वप्रसङ्गादविशेषप्रसङ्गः स्यात् एकशरीरपरिमाणतैव स्यात् नोपचितापचितशरीरान्तरप्राप्तिः। अथ वाऽन्त्यस्य जीवपरिमाणस्यावस्थितत्वात् पूर्व्वयोरप्यवस्थयोरवस्थितपरिमाण एव जीवः स्यात्। ततश्चाविशेषेण सर्व्वदैवाऽणुर्महान् वा जीवोऽभ्युपगन्तव्यो न शरीरपरिमाणः। अतश्च सौगतवदार्हतमपि मतमसङ्गतमित्युपेक्षितव्यम्" इत्यन्तेन जीवस्याणुपरिमाणत्वं ये स्वीचक्रुः तन्मतमुपन्यस्य शा० सू० भा० दूषितं यथा।

"उत्क्रान्तिगत्यागतीनाम्" सू०। इदानीन्तु किंपरिमाणो जीव इति चिन्त्यते किमणुपरिमाणः उत मध्यमपरिमाण आहोस्वित् महापरिमाण इति। ननु च नात्मोत्पद्यते नित्यचैतन्यरूपश्चायमित्युक्तमतश्च पर एवात्मा जीव इत्यापतति, परस्य चात्मनोऽनन्तत्वमाम्नातं तत्र कुतो जीवस्य परिमाणचिन्तावतार इति उच्यते सत्यमेतत् उत्क्रान्तिगत्यागतिश्रवणानि तु जीवस्य परिच्छेदं प्रापयन्ति स्वशब्देन चास्य क्वचिदणुपरिमाणत्वमाम्नायते तस्य सर्व्वस्यानाकुलत्वोपपादनायायमारम्भः। तत्र प्राप्तं तावदुत्क्रान्तिगत्यागतीनां श्रवणादणुर्जीव इति उत्क्रान्तिस्तावत् "स यदाएतस्माच्छरीरादुत्क्रामति सहैवैतैः सर्व्वैरुत्क्रामतीति" गतिरपि "ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्तीति"। आगतिरपि "तस्माल्लोकात् पुनरैत्यस्मै लोकाय कर्म्मणे" इति आसामुत्क्रान्तिगत्यागतीनां श्रवणात्परिच्छिन्नस्तावज्जीवः इति प्राप्नोति न हि विभोश्चलनमवकल्पत इति। सति च परिच्छेदे शरीरपरिमाणत्वस्यार्हतमतपरीक्षायां निरस्तत्वादणुरात्मेति गम्यते। "स्वात्मना चोत्तरयोः" सू०। उत्क्रान्तिः कदाचिदचलतोऽपि ग्रामस्वाम्यनिवृत्तिवद्देहस्वाम्यनिवृत्त्या कर्म्मक्षयेणावकल्प्येत उत्तरे तु गत्यागती नाचलतः सम्भवतः स्वात्मना हि तयोः सम्बन्धोभवति गमेश्च कर्त्तृस्थक्रियात्वात्। अतोऽमध्यमपरिमाणस्य च गत्यागती अणुत्व एव सम्भवतः। सत्योश्च गत्यागत्योरुत्क्रान्तिरपसृप्तिरेव देहादिति प्रतीयते नह्यनपसृप्तस्य देहाद्गत्यागती स्यातां देहप्रदेशानाञ्चोत्क्रान्तावपादनत्ववचनात् "चक्षुष्टो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः" इति। "स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति शुक्रमादाय पुनरेति स्थानमिति" चान्तरेऽपि शरीरे शारीरस्य गत्यागती भवतः तस्मादप्यस्याणुत्वसिद्धिः। "नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात्" सू०। अथापि स्यात् नाणुरयमात्मा, कस्मात्, अतच्छ्रुतेः अणुत्वविपरीतपरिमाणश्रवणादित्यर्थः। "स वा एष महानजः" "आत्मा योऽयं विज्ञानमयः प्राणेषु" "आकाशवत्सर्व्वगतश्च नित्यः" "सत्यंज्ञानमनन्तं ब्रह्म" इत्येवं जातीयका हि श्रुति-